व्याख्यामद्भुतं सुधाढ्यकलसं विद्याञ्च हस्ताम्बुजैः ।
बिभ्राणां कमलासनां कुचनतां वाग्देवतां सस्मितां
वन्दे वाग्विभवप्रदां त्रिनयनां सौभाग्यसम्पत्करीम् ॥”)

व्याख्यानम्यं, क्ली, ( व्याख्यया गम्यम् । ) उत्तराभासभेदः । व्याख्यया विवरणेन गम्यते ज्ञायते यत् । यथा,—
“अन्तर्व्याप्तव्यवहितमपि निगूढ़ार्थं तथाकुलम् ।
व्याख्यागम्यमसारञ्च नोत्तरं शस्यते बुधैः ॥”
इति व्यवहारतत्त्वम् ।

व्याख्यातः, त्रि, विवृतः कथितः । वि-आङ्पूर्व्वकख्याधातोः क्तप्रत्ययेन निष्पन्नमिदम् ।

व्याघातः, पुं, ( व्याहन्यतेऽनेनेति । वि+आ+हन+घञ् । ) विष्कम्भादिसप्तविंशतियोगान्तर्गतत्रयोदशयोगः । यथा,—
“परिघस्य त्यजेदर्द्धं शुभकर्म्म ततः परम् ।
त्यजादौ पञ्च विष्कम्भे सप्त शूले च नाड़िकाः ॥
गण्डव्याघातयोः षट् च नव हर्षणवज्रयोः ।
वैधृतिव्यतिपातौ च समस्तौ परिवर्जयेत् ॥”
इति ज्योतिस्तत्त्वम् ॥*॥

तत्र जातफलम् ।
“व्याघातकर्म्मा च सतां नितान्तं
व्याघातजन्मा मनुजः कठोरः ।
असत्यभाषी त्रपया विहीनो
मन्देक्षणो दीर्घतनुः कृशाङ्गः ॥”
इति कोष्ठीप्रदीपः ॥*॥

अन्तरायः । ( यथा, महाभारते ।१।२।२८८।
“तेन व्याघातमन्त्राणां क्रियमाणमवेक्ष्य च ॥”)
प्रहारः । इति मेदिनी । अलङ्कारविशेषः । तस्य लक्षणं यथा,—
“यद्यथा साधितं केनाप्यपरेण तदन्यथा ।
तथैव यद्विधीयेत स व्याघात इति स्मृतः ॥”
येनोपायेन यत् एकेन उपकल्पितं तस्यान्येन जिगीषुतया तदुपायकमेव यदन्यथाकरणं न खलाधिनत्वस्य व्याहतिहेतुत्वात् व्याघातः । उदाहरणम् ।
“दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः ॥”
इति काव्यप्रकाशे १० उल्लासः ।

व्याघ्रः, पुं, ( व्याजिघ्रतीति । वि+आ+घ्रा+कः । ) जन्तुविशेषः । बाघ इति भाषा । ( यथा, छान्दोग्ये । ६ । ९ । ३ ।
“त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति ॥” ) तत्पर्य्यायः । शार्द्दूलः २ द्वीपी ३ । इत्यमरः ॥ पुण्डरीकः ४ व्याघ्रः ५ चित्रकः ६ पुण्डरीकः ७ । इति जटाधरः ॥ हिंस्रपशुः ८ व्याड़ः ९ हिंसकः १० हिंसारुः ११ श्वापदः १२ । इति शब्दरत्नावली ॥ पञ्चनखः १३ व्यालः १४ गुहाशयः १५ तीक्ष्णदंष्ट्रः १६ भीरुः १७ नखायुधः १८ ।

अस्य मांसगुणाः ।
“शार्द्दूलसिंहशरभर्क्षतरक्षुमुख्या
येऽन्ये प्रसह्य विनिहन्त्यभिवर्त्तयन्ति ।
ते कीर्त्तिताः प्रसहनाः पललं तदीय-
मर्शःप्रमेहजठरामयनाशहारि ॥”
इति राजनिर्घण्टः ॥

स तु कश्यपभार्य्यादंष्ट्रासन्तानः । यथा,—
“दंष्ट्रा त्वजनयत् पुत्त्रान् व्याघ्रसिंहांश्च भाविनी ।
द्वीपिनश्च सुतास्तस्या व्याल्याद्याश्चामिषप्रियाः ॥”
इत्याद्ये वह्निपुराणे काश्यपीयवंशनामाध्यायः ॥
नरादिशब्दोत्तरस्थः श्रेष्ठार्थवाचकः । ( यथा, महाभारते । १ । १५२ । २९ ।
“किन्नुदुःखतरं शक्यं मया द्रष्टुमतःपरम् ।
योऽहमद्य नरव्याघ्रान् सुप्तान् पश्यामि
भूतले ॥”)
रक्तैरण्डः । करञ्जः । इति मेदिनी ॥

व्याघ्रदलः, पुं, एरण्डवृक्षः । इति शब्दमाला ॥ राजनिर्घण्टे रक्तैरण्डपर्य्याये व्याघ्रतल इति पाठः ॥

व्याघ्रनखं, क्ली, ( व्याघ्रस्य नखमिव । ) नखीनामगन्धद्रव्यम् । तत्पर्य्यायः । व्याड़ायुधम् २ करजम् ३ चक्रकारकम् ४ । इत्यमरः ॥ नखाङ्कम् ५ नखी ६ नख्यम् ७ व्याघ्रनखी ८ । इति शब्दरत्नावली ॥ ( यथा, वृहत्संहितायाम् ।७७।६।
“मञ्जिष्ठया व्याघ्रनखेन शुक्त्या
त्वचा सकुष्ठेन रसेन चूर्णः ।
तैलेन युक्तोऽर्कमयूखतप्तः
करोति तच्चम्पकगन्धितैलम् ॥”)
तत्पर्य्यायगुणाः ।
“नखं व्याघ्रनखं व्याघ्रायुधं तच्चक्रकारकम् ।
नखं स्वल्पं नखी प्रोक्ता हनुर्हट्टविलासिनी ॥
नखद्वयं ग्रहश्लेष्मवातास्रज्वरकुष्ठहृत् ।
लघूष्णं शुक्रलं वर्ण्यं स्वादु व्रणविषापहम् ।
अलक्ष्मीमुखदौर्गन्ध्यहृत् पाकरसयोः कटुः ॥”
इति भावप्रकाशः ॥
कन्दविशेषः । नखक्षतविशेषः । इति मेदिनी ॥

व्याघ्रनखः, पुं (व्याघ्रस्य नखमिव कण्टकं यस्य ।) स्नुहीवृक्षः । व्यालनखः । इति राजनिर्घण्टः । व्याघ्रस्य नखश्च ॥

व्याघ्रनखकं, क्ली, ( व्याघ्रनखमेव । स्वार्थे कन् । ) नखक्षतम् । इति शब्दमाला ॥

व्याघ्रनायकः, पुं, ( व्याघ्रस्य नायक इव । ) शृगालः । इति राजनिर्घण्टः ॥

व्याघ्रपात्, [द्] पुं, ( व्याघ्रस्य पाद इव ग्रन्थियुक्तमूलानि यस्य । “पादस्य लोपोऽहस्त्यादिभ्यः ।”५। ४ । १३८ । इत्यलोपः ।) विकङ्कतवृक्षः । इत्यमरः ॥ मुनिविशेषः । इति पुराणम् ॥ व्याघ्रतुल्यचरणे,त्रि । इति मुग्धबोधव्याकरणम् ॥

व्याघ्रपादः, पुं, (व्याघ्रस्य पादा इव मूलानि यस्य ।) विकङ्कतवृक्षः । विकण्टकवृक्षः । इति राजनिर्घण्टः ॥ (मुनिविशेषः । यथा, महाभारते । १३ । १४ । १०६ ।
“पुराकृतयुगे तात ऋषिरासीत् महायशाः ।
व्याघ्रपाद इति ख्यातो वेदवेदाङ्गपारगः ॥”)

व्याघ्रपुच्छः, पुं, ( व्याघ्रस्य पुच्छमिव सदृशदलमस्य । ) एरण्डवृक्षः । इत्यमरः ॥ व्याघ्रस्य लाङ्गूलञ्च ॥

व्याघ्राटः, पुं, (व्याघ्र इव अटतीति । अट गतौ+पचाद्यच् । ) भरद्वाजपक्षी । इत्यमरः ॥

व्याघ्रादनी, स्त्री त्रिवृता । इत्यमरः ॥

व्याघ्रास्यः, पुं, ( व्याघ्रस्य आस्यमिव आस्यमस्य ।) विड़ालः । इति शब्दचन्द्रिका ॥ व्याघ्रमुखे, क्ली ॥

व्याघ्री, स्त्री, ( व्याघ्र+ङीष् । ) कण्टकारी । इत्यमरः ॥ व्याघ्रपत्नी च ॥ ( यथा, रघुः । १२ । ३७ ।
“तस्याः परिभवो व्याघ्र्यामित्यवेहि त्वया-
कृतम् ॥”)

व्याजः, पुं, ( अजति यथार्थव्यवहारादपगच्छत्यनेनेति । वि+अज+घञ् । घञि विभाषा नास्ति । ) कपटः । स तु अयथार्थव्यवहारः । वचनमात्रफलम् । इति सर्व्वानन्दो मधुश्च ॥ अपदेशः । स कारणान्तरप्रवृत्तिः कारणान्तरोद्भावनम् । व्याजोऽत्र स्वरूपाच्छादनम् । यथा ध्यानव्याजमुपेत्य चिन्तयसि कामिति । व्याजोऽयमभिप्रायगोपनफलः । पूर्व्वोक्तस्तु परापकारफलः । इत्ययथार्थव्याजयोर्भेदः । अन्यमुद्दिश्य अन्यप्रतिपादनमिह व्याज इत्यर्थः । यदाह अन्यमुद्दिश्य अन्यार्थमनुष्ठानं अपदेशः । यथा, जलक्रीड़ामुद्दिश्य जारावलोकनार्थं यातीति । इत्यमरभरतौ ॥

व्याजनिन्दा, स्त्री, (व्याजेन निन्दा ।) कपटकुत्सा । अलङ्कारविशेषः । यथा,—
“निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गीयते ॥”
इति चन्द्रालोकः ॥
( उदाहरणं यथा,—
“विधेसनिन्द्यो यस्तिप्रागेकमेवाहरच्छिरः ॥”)

व्याजस्तुतिः, स्त्री, ( व्याजेन स्तुतिः । व्याजरूपा स्तुतिश्च ।) कपटप्रशंसा । अलङ्कारभेदः । यथा,
“उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुति-
निन्दयोः ॥”
इति चन्द्रालोकः ॥
( उदाहरणं यथा,—
“कः स्वर्धुनि! विवेकस्ते पापिनो नयसे दिवम् ॥”)

व्याजोक्तिः, स्त्री, (व्याजेन उक्तिः ।) छलवाक्यम् । अलङ्कारविशेषः । यथा,—
“व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम् ॥”
इति चन्द्रालोकः ॥
( उदाहरणं यथा,—
“सखि! पश्य गृहारामपरागैरस्मि धूसरा ॥”)

व्याड़ः, पुं, सर्पः । मांसभक्षकपशुः । इत्यमरः ॥ ( यथा, मार्कण्डेये । । १५ । १० ।